Alamkāra (Figures of Speech)
CC-6, Sec-D

# अलङ्कारनिर्णयः

## • रूपकम् ⇒

आहवे जगदुद्दण्ड राजमण्डलराहवे।
श्रीनृसिंहमहीपाल स्वस्त्यस्तु तव बाहवे॥

अत्र स्तवकेन उच्यते — हे नृसिंहमहीपाल युद्धे प्रबलवीराणां नृपाणां शत्रुस्वरूपस्य तव बाहोः मङ्गलमस्तु इति।

अत्र राजमण्डले चन्द्रत्वारोपः राजबाहौ शत्रुत्वारोपस्य कारणं जातम्। तेन अत्र श्लिष्टशब्दनिबन्धनं केवलं परम्परितं रूपकम्। रूपकालङ्कारस्य लक्षणमुक्तं विश्वनाथेन — 'रूपकं रूपितारोपो विषये निरपह्नवे इति"। अप्रतिसिद्धे उपमेये रूपितस्य उपमानस्य आरोपे रूपकं भवति।

## • तुल्ययोगिता

त्वदङ्गमार्दवं दृष्टुः कस्य चित्ते न भासते।
मालती शशभृल्लेखाकदलीनां कठोरता॥

नायिकाया अङ्गस्य कोमलतादर्शनेन नायकस्य चित्ते मालत्याः चन्द्रलेखायाः कदलीनां च कठोरता प्रस्फुटिता भवति इति कवेराशयः।

नायिकायाः अङ्गकोमलतावर्णनं हि अत्र प्रस्तुतपदार्थः। अत्र अप्रस्तुतानां मालतीचन्द्रलेखाकदलीनां एकेन कठोरतारूपेण धर्मेण सम्बन्धः कीर्त्तितः। तेनात्र तुल्ययोगिता अलङ्कारः। तत् लक्षणं हि — "पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत्। एकधर्माभिसम्बन्धः स्यात्तदा तुल्ययोगिता। कठोरता हि गुणः। मालत्यादयः तेन कठोरतागुणेन सह सम्बन्धा जायन्तेऽत्र। तेन अत्र तुल्ययोगिता अलङ्कारः भवेत् अप्रस्तुतानाम् एकधर्माभिसम्बन्धवशात्।

## उत्प्रेक्षा

ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः
गुणा गुणानुबन्धित्वात् तस्य सप्रसवा इव ॥

अत्र गुणोत्प्रेक्षा अलङ्कारः। उत्प्रेक्षाया लक्षणमुक्तं विश्वनाथेन — भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना इति। प्रकृतस्य उपमेयस्य उपमान-स्वरूपेण सम्भावना हि उत्प्रेक्षा। सम्भावना उत्कटः निश्चितप्रायः एककोटिकः संशयः। सा सम्भावना हि उत्प्रेक्षायाः प्राणभूता।

अस्मिन् श्लोके नृपस्य दिलीपस्य प्रशंसा क्रियते कविना कालिदासेन रघुवंशे — तस्य दिलीपस्य शास्त्रादिज्ञाने सत्यपि मौनं जल्पवितण्डादिराहित्यम् शक्तिसत्त्वेऽपि शत्रौ अपराधसहिष्णुता हि क्षमा। त्यागे दाने श्लाघाविपर्ययः आत्मप्रशंसाराहित्यम् इत्यादयः गुणाः गुणानुसारित्वात् सहोदरा इव मन्यन्ते। अत्र सप्रसवत्वं हि गुणः। तेनेयं गुणोत्प्रेक्षा इत्युच्यते।

## उपमा

गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥

अभिज्ञानशाकुन्तलस्थे श्लोकेऽस्मिन् दुष्यन्तेन वर्ण्यते स्वावस्था। ध्वजस्य दण्डो यथाग्रे चलति तथैव तस्य शरीरं पुरतो धावति। पश्चाच्च तस्य चञ्चलं चित्तं पताकायाः चीनदेशीयक्षौमवस्त्रमिव शकुन्तलाभिमुखं गच्छति।

अत्र दुष्यन्तस्य शरीरं ध्वजदण्डेन उपमीयते तस्य चञ्चलं चित्तं ध्वजलग्नेन चीनांशुकेन उपमीयते। अत्र उपमानं ध्वजदण्डः चीनांशुकं च। उपमेयं च दुष्यन्तस्य शरीरं चञ्चलं चित्तं च। उपमेयेन सह उपमानस्य साम्यम् अत्र इवशब्देन वाच्यम्। वैधर्म्यमपि अनुल्लिखितम्। अतस्तावत्र उपमालङ्कारः। तल्लक्षणं हि — 'साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये उपमा द्वयोः' इति।